# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (१६)

## २६.०२.२०१३

- गुणवचनम् -
- सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते ।
- आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः ॥ (महाभाष्यम्)

- मृद्वीति ।

- मृद्वी, मृदुः ।

# ५०३. बह्वादिभ्यश्च (४.१.४५)

- पदद्वयम् । बह्वादिभ्यः, च ।
- ‘अन्यतो ङीष्’ (४.१.४०) इत्यतः ‘ङीष्’ इति, ‘वोतो गुणवचनात्’ (४.१.४४) इत्यतः ‘वा’ इति च अनुवर्तते ।
- एभ्यो वा ङीष् स्यात् ।
- बह्वादिभ्यश्चेति ।
- बह्वी, बहुः ।
- बह्वी, बहुरिति ।

- ‘कृदिकारादक्तिनः’ (ग ५०)
- बह्वाद्यन्तर्गणसूत्रम् ।
- कृतो य इकारः तदन्तात् प्रातिपदिकात् ङीष् वा स्यात्, न तु क्तिन्नर्थकप्रत्ययान्ताद् इत्यर्थः ।
- रात्रिः, रात्री ।
- रात्रिः, रात्रीति ।

- ‘सर्वतोऽक्तिन्नर्थादित्येके’ (ग ५१)
- कृदिकारान्ताद् अकृदिकारान्तादपि ङीष् वा स्यात्, न तु क्तिन्नर्थकप्रत्ययान्तात् ।
- शकटिः, शकटी ।
- अव्युत्पन्नं प्रातिपदिकम् ।

- अक्तिन्नर्थात् किम् - अजननिः ।
- अजननिरिति ।

- क्तिन्नन्तत्वाद् अप्राप्ते विध्यर्थं पद्धतिशब्दो गणे पठ्यते ।
- ‘हिमकाषिहतिषु च’ इति पद्भावः ।
- पद्धतिः, पद्धती ।